इति वैद्यकरसेन्द्रसारसंग्रहे पाण्डुरोगाधिकारे ॥ * ॥ * ॥)

पाण्डुः, स्त्री, (पडि+कुः । निपातनात् दीर्घत्वम् ।) माषपर्णी । इति शब्दचन्द्रिका ॥ माषाणी इति भाषा ॥ पाण्डुवर्णस्त्री । इति मुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं, (पाण्डु+संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराजा । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पुं, (पाण्डुवर्णानि कण्टकान्यस्येति ।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकम्बलः, पुं, (पाण्डुवर्णः कम्बलः नित्यकर्म्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी । ले,१७०॥ पाण्डुवर्णकम्बलः । इति भरतः॥

पाण्डुकम्बली, [न्] पुं, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल+"पाण्डुकम्बलादिनिः ।" ४। २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलावृतरथः । इत्यमरः । २ । ८ । ५४ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पुं, (पाण्डुवर्णस्तरुरिति कर्मधारयः ।) धवदृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पुं, (पाण्डुवर्णो नाग इव । यद्वा, नाग इव पाण्डुरिति राजदन्तादिवत् समासः ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतसर्षपश्च ॥

पाण्डुपत्री, स्त्री, (पाण्डु पत्रमस्या इति जातित्वात् ङीष् ।) रेणुका । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुतः । अलक्षणः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पुं, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) चिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरत्र इति । "कृष्णोदकपाण्डुसंख्यापूर्व्वाया भूमेरजिष्यते ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा,—

"पाण्डूदक् कृष्णतो भूमिः पाण्डूदक् कृष्णमृत्तिका ॥"

इति हेमचन्द्रः ॥

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुमृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पुं, (पाण्डुरस्यास्तीति । पाण्डु+"नगपांशुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १७ ॥ (यथा, भागवते । ८ । ८ । ३ ।

"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः स्पृहाञ्चक्रे नेन्द्र ईश्वरशिक्षया ॥")

कामलारोगः । इति शब्दरत्नावली ॥ श्वित्ररोगे, स्त्री । इति हलायुधः ॥

पाण्डुरङ्गः, पुं, (पाण्डुराणि अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिश्लेष्मपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पुं, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिका पुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि, (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं अस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूसरा ३ वृत्तबीजका ४ भूरिफलिलता ५ पाण्डुफली ६ । अस्या गुणाः । शिशिरत्वम् । गौल्यत्वम् । कफास्रदोषपित्तमूत्राघातनाशित्वम् । बल्यत्वम् । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरस्त्यस्या इति तत्तदाप् च ।) माषपर्णी । इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पुं, (पाण्डुरं पाण्डुरत्वं आ सम्यक् रूपेण गच्छतीति । गम+डः । यद्वा, पाण्डुः रागोऽस्येति ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते, त्रि ॥

पाण्डुरेक्षुः, पुं, (पाण्डुरः श्वेतवर्ण इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पुं, (पाण्डुर्लेखः ।) पाण्डुलिपिः । मुसविदा इति पारस्यभाषा ॥ यथाह व्यासः ।

"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥
फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानीवाङ्गान्यस्त्यस्याः ।) माषपर्णी ॥ इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री, (पाण्डु लोम यस्याः ।) माषपर्णी । इति जटाधरः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ॥

पाण्डुशर्करा, स्त्री, (पाण्डुः शर्करा इव यस्यां रोगावस्थायामित्यर्थः ।) रोगविशेषः । यथा, गारुडे १८२ अध्याये ।

"पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम् ।
साधितं छागदुग्धेन पीतं शर्करयान्वितम् ॥
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्कराम् ॥"

पाण्डुशर्मिला, स्त्री, द्रौपदी । इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः, पुं, वर्णसङ्करविशेषः । स तु चाण्डालाद्वैदेह्यां जातः ॥ (अस्योत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।

"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥"

"वैदेह्यां चण्डालात् पाण्डुसौपाकाख्यो वेणुव्यवहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसौपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १३ । ४८ । २६ ।

"चण्डालात् पाण्डुसौपाकस्त्वक्सारव्यवहारवान् ॥")

पाण्यः, त्रि, (पण व्यवहारस्तुत्योः+ण्यत् ।) स्तुत्यः । स्तवनीयः । ("पण्या गौः व्यवहर्त्तव्येत्यर्थः । पाण्यमन्यत् स्तुत्यर्हमित्यर्थः ।" इति "सिद्धान्तकौमुद्याम् । ३ । १ । १०१ । इत्यस्य सूत्रस्य वृत्तौ व्याख्यातम् ॥)

पातः, पुं, (पत+घञ् ।) पतनम् । (यथा, महाभारते । ३ । १३३ । २६ ।

"वड़वे इव संयुक्ते श्येनपाते दिवौकसाम् ।
कस्तयोर्गर्भमाधत्ते गर्भं सुसुवतुश्च कम् ॥")

पाते, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ छादयतीति । पत+णिच्+अच् ।) राहुः । यथा,—

"ताड़ितः खदहनैर्हिमसक्ताः
षट्कषट्कशरहृत्फलमांशाः ।
खं भुवे कुमुदिनीपतिपातो
राहुमाहुरिह केऽपि तदेव ॥"

इति सिद्धान्तशिरोमणिः ॥

पातकं, क्ली, (पातयति अधो गमयति दुष्क्रियाकारिणमिति । पत+णिच्+ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ एनः ६ पाप्मा ७ किल्बिषम् ८ कलुषम् ९ किण्वम् १० कल्मषम् ११ वृजिनम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तत्तु नवविधं यथा । अतिपातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ सङ्करीकरणम् ५ अपात्रीकरणम् ६ जातिभ्रंशकरम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःकृतानि दशविधपापानि यथा,—

"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"

इति तिथ्यादितत्त्वम् ॥

पातङ्गिः, पुं, (पतङ्गस्य सूर्य्यस्यापत्यमिति । पतङ्ग+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) शनैश्चरः । इति शब्दरत्नावली ॥